# स्वर्गादपि गरीयसी

## (अव्ययप्रयोगः भवत् शब्दस्य च प्रयोगः)

पुरा एकः प्रजावत्सलः राजा आसीत् । सः प्रजाः पुत्रवत् पालयति स्म । मातृभूमिसेवा तस्य परमकर्त्तव्या आसीत् । **एकदा** त्रयः साधवः राजभवनं समागताः । राजा स्वयं तेषां सत्कारं सादरं कृतवान् । तस्य अतिथिसेवया साधवः **नितरां** प्रीताः । प्रस्थानकाले ते राज्ञे किञ्चित् दातुम् अभिलाषं कृतवन्तः । प्रथमः साधुः **यावत्** राजप्रासादात् निर्गतः, **तावत्** भूपतये एकं खड्गं प्रदाय अवदत् - राजन् ! एषः कृपाणः इन्द्रात् प्राप्तः । यदि **भवान्** एतं खड्गं नीत्वा दिग्विजययात्रां करिष्यति, तर्हि समग्रं विश्वम् अक्लेशेन आयत्तं भविष्यति । राजा अवदत् - महात्मन् ! मम विश्वविजयेन प्रयोजनं नास्ति । राज्यजयेन मम प्रजानां कः लाभः भविष्यति ? युद्धेन केवलं मम प्रजाः मृताहताः भविष्यन्ति । प्रजाकल्याणं मम काम्यम् । अतः खड्गेन प्रयोजनं नास्ति । सहसा द्वितीयः साधुः महाराजं **निकषा** गतवान् । तस्मै एकं हीरकखण्डं प्रदाय अवदत् - एतेन भवान् सर्वेषु राजसु श्रेष्ठः धनी भविष्यति । राजा उक्तवान् - **यद्यपि** एषः हीरकः मूल्यवान्, **तथापि** अनर्थस्य कारणं भवति । अपि च धनसुरक्षार्थं सैन्याः नियोजिताः भवेयुः । एतेन प्रजानां देशस्य च समृद्धिः न स्यात् । अतः हीरकः नावश्यकः । क्रमशः तृतीयः साधुः भूपालस्य अग्रे उपस्थितः । सः अवदत् - भो ! राजन् ! **भवतः** पार्थिवद्रव्येषु आसक्तिः नास्ति इत्यहं जानामि । अहं **भवन्तं** विद्याबलेन स्वर्गं नेष्यामि । तत्र भवान् स्वर्ग्यं सुखं प्राप्स्यति । राजा अकथयत् - क्षमां करोतु पुण्यात्मन् ! मातृभूमिं प्रजागणं च विहाय कुत्रचित् गन्तुं न इच्छामि । मातृभूमिः मम माता, अहं पृथिव्याः पुत्रः । मम जन्मभूमिः स्वर्गात् अपि गरीयसी भवति । एतत् श्रुत्वा प्रसन्नाः साधवः उक्तवन्तः - भो भूपते ! भवान् **वस्तुतः** पृथ्वीपतिः भवति । भवतः देशप्रीतिः सर्वेषाम् अनुकरणीया । कल्याणमस्तु इति आशीर्वादं प्रदाय ते प्रस्थिताः ।

**नितराम्, कृपाणः, तर्हि, काम्यम्, हीरकः, आयत्तम्, सहसा, आसक्तिः, प्रदाय, पुत्रवत्, वस्तुतः**

## टिप्पणी

### शब्दार्थ :

पुरा - पूर्वम् (ପୂର୍ବକାଳରେ) ।

सत्कारम् - आतिथ्यम् (ଅତିଥି ସତ୍କାର) ।

नितराम् - अतीव (ଅତ୍ୟନ୍ତ) ।

कृपाणः - खड्गः (ଖଣ୍ଡା) ।

काम्यम् - अभिलषितम् (ଇଚ୍ଛା) ।

समृद्धिः - उन्नतिः (ପ୍ରଗତି) ।

आसक्तिः - आग्रहः (ଅନୁରାଗ) ।

विहाय - परित्यज्य (ଛାଡ଼ି) ।

प्रसन्नाः - प्रीताः (ଆନନ୍ଦିତ) ।

स्वर्ग्यम् - दिव्यम् (ସ୍ୱର୍ଗୀୟ) ।

वस्तुतः - यथार्थतः (ପ୍ରକୃତରେ) ।

कल्याणम् - मंगलम् (ମଙ୍ଗଳ) ।

## अभ्यासः

**(क) उच्चैः पठत - 'भवत्' शब्दः - (ଆପଣ) (ପୁଂଲିଙ୍ଗ)**

| | | | |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधने | भवन्! | भवन्तौ! | भवन्तः! |

**(ख) उच्चैः पठत, लिखत**

| | | | |
|---|---|---|---|
| भवत् -प्रथमाविभक्तौ | भवान् | भवन्तौ | भवन्तः |
| श्रीमत् -प्रथमाविभक्तौ | श्रीमान् | श्रीमन्तौ | श्रीमन्तः |
| भगवत् -प्रथमाविभक्तौ | भगवान् | भगवन्तौ | भगवन्तः |
| बुद्धिमत् -प्रथमाविभक्तौ | बुद्धिमान् | बुद्धिमन्तौ | बुद्धिमन्तः |

**(ग) अव्ययप्रयोगः -**

| | | |
|---|---|---|
| यद्यपि - तथापि | → | यद्यपि स वृद्धः, तथापि सः धावति । |
| यदि - तर्हि | → | यदि त्वं तृषार्त्तः, तर्हि जलपानं कुरु । |
| यावत् - तावत् | → | भगिनी यावत् खादति, अहं तावत् पठामि । |
| यथा - तथा | → | यथाहं वदामि, त्वं तथा कुरु । |
| यत्र - तत्र | → | यत्र शिक्षकः तत्र छात्रः। |
| यत् - तत् | → | अहं यत् वदामि त्वं तत् कुरु । |
| यदा - तदा | → | यदा वृष्टिः भवति, तदा भेकाः गर्जन्ति । |
| यतः - ततः | → | यतः धर्मः ततः जयः । |
| सहसा | → | विपत्काले सहसा निर्णयः न ग्रहणीयः । |
| प्रायः | → | श्रमं विना प्रायः सफलता न भवति । |
| अग्रतः | → | मातुः अग्रतः शिशुः धावति । |

**१. योग्यपदेन शून्यस्थानं पूरयत -**

यथा - **भवान्** अत्र आगच्छति । (भवत् - प्रथमा)

(क) माता ............... आह्वयति । (भवत् - द्वितीया)

(ख) ................ पुस्तकं पठन्तु । (भवत् - प्रथमा)

(ग) ............... उपकारं न विस्मरामि । (भवत् - षष्ठी)

(घ) अहं ................ निकषा गमिष्यामि । (भवत् - द्वितीया)

(ङ) ................ विश्वासः नास्ति । (भवत् - सप्तमी)

**२. उदाहरणानुसारं शून्यस्थानं पूरयत -**

**यद्यपि** क्षुधा नास्ति, **तथापि** सः खादति ।

(क) यद्यपि मरणम् अनिवार्यं, .............. जनाः तत् न चिन्तयन्ति ।

(ख) यदि धूमः अस्ति, ............. अग्निः भवति ।

(ग) विपत्काले .................... निर्णयः न ग्रहणीयः ।

(घ) ................ सः ज्वराक्रान्तः तथापि सेवाकार्यं करोति ।

(ङ) पिता यथा वदति त्वं ................ कुरु ।

(च) समुद्रे यावत् जलम् अस्ति, सरोवरे ..................... नास्ति ।

(छ) यदि क्षुधा नास्ति ...................... वैद्यं निकषा गच्छ ।

(ज) गुरुः यथा गायति, .................... ......... छात्रः अनुकरोति ।

(झ) शिक्षकस्य ...................... उपविश ।

(ञ) शिशवः ................... सरलाः ।

**३. उचितपदेन शून्यस्थानं पूरयत -**

(क) साधवः ............... प्रीताः । (नूनं, नितरां, अनिच्छया)

(ख) साधुः भूपालस्य ............... उपस्थितः । (अग्रतः, पृष्ठतः, दूरे)

(ग) यद्यपि हीरकः मूल्यवान् .............. अनर्थस्य कारणम् । (तर्हि, तथापि, तथा)

(घ) मातृभूमिः ............... माता । (तुभ्यं, मम, तस्य)

(ङ) एषः खड्गः ................ प्राप्तः । (इन्द्रात्, महादेवात्, अर्जुनात्)

(च) भवान् गृहं ................ । (गच्छसि, गच्छति, गच्छन्ति)

(छ) ..................... सर्वं करोति । (भगवान्, भगवन्तः, अहं)

(ज) ................... जनाः सम्मानिताः भवन्ति । (धीमान्, धीमन्तः, धीमन्तौ)

**४. संशोधनं कुरुत -**

(क) अतः हीरकः नावश्यकम् ।

(ख) प्रजाकल्याणं मम काम्यः ।

(ग) साधुः भूपालम् अग्रे उपस्थितः ।

(घ) भवान् यात्रां करिष्यसि ।

(ङ) प्रसन्नाः साधुः उक्तवन्तः ।

५. **एकपदेन उत्तरं लिखत -**

(क) राज्ञः आतिथ्येन के प्रसन्नाः ?

(ख) द्वितीयः साधुः महाराजाय किं प्राददात् ?

(ग) केन विश्वं करायत्तं भविष्यति ?

(घ) प्रथमः साधुः नृपतये किं दत्तवान् ?

(ङ) का मम माता ?

६. **बन्धनीमध्यस्थयोग्यपदेन शून्यस्थानं पूरयत -**

(क) ग्रामं .................... नदी वहति ।

(ख) .................... कार्यं न करणीयम् ।

(ग) कदापि ...................... मा वद ।

(घ) विद्यालयस्य .................... क्रीड़ाप्रान्तरम् अस्ति ।

(ङ) यदि उन्नतिम् इच्छसि, .................... परिश्रमं कुरु ।

(च) सर्पात् भीतः सः .................... पलायितः ।

(छ) .................... सः दुर्बलः तथापि सः कठिनं परिश्रमं करोति ।

(ज) तस्य प्रचुरं धनम् अस्ति ................... सः कृपणः ।

(झ) गुरुः यथा वदति छात्रः ................... करोति ।

(ञ) उपविश्य पठ, .................... उत्थाय पठ ।

**(अग्रतः, परन्तु, तथा, नोचेत्, यद्यपि, सहसा, दूरम्, मिथ्या, निकषा, तर्हि,)**

७. **मातृभाषया अनुवादं कुरुत -**

(क) सः प्रजाः पुत्रवत् पालयति स्म ।

(ख) तस्य आतिथ्येन साधवः नितरां प्रीताः ।

(ग) प्रजाकल्याणं मम काम्यम् ।

(घ) अपि च धनसुरक्षार्थं सैन्याः नियोजिताः भवेयुः ।

(ङ) जन्मभूमिः स्वर्गादपि गरीयसी भवति ।

८.  **विक्षिप्तवर्णैः शुद्धं शब्दं रचयत -**

जा त्स व प्र लः , तृ भू मा मिः , दा रा प्रा ज सा त् , शी आ द र्वा म्, प्री दे श तिः , प ि त रा थि य अ णः, य ग सी री ।

९.  **स्तम्भमेलनं कुरुत -**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| यदि | करिष्यति |
| हीरकः | आगच्छन्तु |
| यद्यपि | तर्हि |
| भवन्तः | मूल्यवान् |
| भवान् | तथापि |

१०. **वाक्येषु व्यवहरत -**

क्रमशः, यावत्, सहसा, मिथ्या, तर्हि, तथापि, दूरम् ।

●